# पुरुषसूक्त

## अथ पुरुषसूक्तम् ॥

ॐ तच्छं॒ योरावृंणीमहे । गा॒तुं य॒ज्ञायं । गा॒तुं य॒ज्ञपंतये । दैवीं॑ स्व॒स्तिरंस्तु नः ।

स्व॒स्तिर्मानुंषेभ्यः । ऊ॒र्ध्वं जिंगातु भेष॒जम् । शन्नों अस्तु द्वि॒पदें । शं चतुंष्पदे ।

ॐ शान्ति॒ः शान्ति॒ः शान्तिंः ।

हरिः ॐ ।

ॐ स॒हस्रंशीर्षा॒ पुरुंषः । स॒ह॒स्रा॒क्षः स॒हस्रंपात् ।

स भूमिं वि॒श्वतों वृ॒त्वा । अत्यंतिष्ठद्दशाङ्गु॒लम् । १

पुरुंष ए॒वेदꣳ सर्वमं॑ । यद्भू॒तं यच्च॒ भव्यमं॑।

उ॒तामृंत॒त्वस्येशांनः । यदन्नेंनाति॒रोहंति । २

ए॒तावांनस्य महि॒मा । अतो॒ ज्याया॑ꣳश्च॒ पूरुंषः ।

पादोंऽस्य॒ विश्वां भू॒तानिं । त्रि॒पादंस्या॒मृतं दि॒वि । ३

-*

SRI VEDA BHARATHI PEETHAM-BASAR
SRI VEDA VIDYANANDA SWAMIJI
https://vedabharathipeetham.org
https://www.youtube.com/c/SVBPSriVedaBharathiPeetham
Contact-8309925443/  G-Pay/Phone-pe-9441321492



त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः । पादो॑ऽस्ये॒हाऽऽभ॑वा॒त्पुनः॑ ।

त॒तो॒ विश्व॒ङ्व्य॑क्रामत् । सा॒श॒ना॒न॒श॒ने अ॒भि । ४

तस्मा॑द्वि॒राड॑जायत । वि॒राजो॒ अधि॒ पूरु॑षः ।

स जा॒तो अत्य॑रिच्यत । प॒श्चाद्भूमि॒मथो॑ पु॒रः । ५

यत्पुरु॑षेण ह॒विषा॑ । दे॒वा य॒ज्ञमत॑न्वत ।

व॒स॒न्तो अ॑स्यासी॒दाज्य॑म् । ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः । ६

स॒प्तास्या॑सन्परि॒धयः॑ । त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।

दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्न॒न्पुरु॑षं प॒शुम् । ७

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्षन्॑ । पुरु॑षं जा॒तम॑ग्र॒तः ।

तेन॑ दे॒वा अय॑जन्त । सा॒ध्या ऋष॑यश्च॒ ये । ८

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॑ । संभृ॑तं पृषदा॒ज्यम् ।

प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान्ग्रा॒म्याश्च॒ ये । ९

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुतः॑ । ऋचः॒ सामा॑नि जज्ञिरे ।

छन्दाꣳ॑सि जज्ञिरे॒ तस्मा॑त् । यजु॒स्तस्मा॑दजायत । १०

तस्मा॒दश्वा॑ अजायन्त । ये के चो॑भ॒याद॑तः ।

-*

SRI VEDA BHARATHI PEETHAM-BASAR
SRI VEDA VIDYANANDA SWAMIJI
https://vedabharathipeetham.org
https://www.youtube.com/c/SVBPSriVedaBharathiPeetham
Contact-8309925443/  G-Pay/Phone-pe-9441321492



गावो॑ ह जज्ञिरे॒ तस्मा॑त् । तस्मा॑ज्जा॒ता अ॑जा॒वयः॑ । ११

यत्पुरु॑षं॒ व्य॑दधुः । कृ॒ति॒धा व्य॑कल्पयन् ।

मुखं॒ किम॑स्य॒ कौ बा॒हू । कावू॒रू पादा॑वुच्येते । १२

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्यः॑ कृ॒तः ।

ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ । प॒द्भ्याꣳ शू॒द्रो अ॑जायत । १३

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षो॒ः सूर्यो॑ अजायत ।

मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत । १४

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।

प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॑त् । तथा॑ लो॒काꣳ अ॑कल्पयन्
। १५

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑म् । आ॒दि॒त्यव॑र्णं॒ तम॑सस्तु॒ पा॒रे
।

सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीरः॑ । नामा॑नि
कृ॒त्वाऽभि॒वद॒न् यदास्ते॑ । १६

धा॒ता पुरस्ता॒द्यमु॑दाज॒हार॑ । श॒क्रः
प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः ।

-*

SRI VEDA BHARATHI PEETHAM-BASAR
SRI VEDA VIDYANANDA SWAMIJI
https://vedabharathipeetham.org
https://www.youtube.com/c/SVBPSriVedaBharathiPeetham
Contact-8309925443/  G-Pay/Phone-pe-9441321492



तमे॒वं वि॒द्वान॒मृतं इ॒ह भंवति । नान्यः पन्था॒ अयंनाय विद्यते । १७

य॒ज्ञेनं य॒ज्ञमंयजन्त दे॒वाः । तानि॒ धर्मा॑णि प्रथ॒मान्यांसन् ।

ते ह॒ नाकं महि॒मानंः सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्याः सन्तिं दे॒वाः । १८

॥ ॐ नमो नारांयणा॒य ॥

॥ उत्तरनारायणम् ॥

अ॒द्भ्यः संभूंतः पृथि॒व्यै रसा॑च्च । वि॒श्वकंर्मण॒ः समंवर्त॒ताधिं ।

तस्य॒ त्वष्टां वि॒दधंद्रू॒पमेंति । तत्पुरुंषस्य॒ विश्व॒माजांन॒मग्रें । १

वेदा॒हमे॒तं पुरुंषं म॒हान्तम॑ । आ॒दि॒त्यव॑र्णं॒ तमंस॒ः परंस्तात् ।

-*

SRI VEDA BHARATHI PEETHAM-BASAR
SRI VEDA VIDYANANDA SWAMIJI
https://vedabharathipeetham.org
https://www.youtube.com/c/SVBPSriVedaBharathiPeetham
Contact-8309925443/ G-Pay/Phone-pe-9441321492



तमे॒वं वि॒द्वान॒मृत॑ं इ॒ह भ॑वति । नान्यः पन्था॑
विद्य॒तेय॑ऽनाय । २

प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः । अ॒जाय॑मानो बहु॒धा
विजा॑यते ।

तस्य॒ धीरा॒ः परि॑जानन्ति॒ योनि॑म् । मरी॑चीनां
प॒दमि॑च्छन्ति

वे॒धस॑ः । ३

यो दे॒वेभ्य॒ आत॑पति । यो दे॒वानां॑ पु॒रोहि॑तः ।

पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः । नमो॑ रु॒चाय॒ ब्राह्म॑ये । ४

रुचं॑ ब्रा॒ह्मम् ज॒नय॑न्तः । दे॒वा अग्रे॒ तद॑ब्रुवन् ।

यस्त्वै॒वं ब्रा॑ह्म॒णो वि॒द्यात् । तस्य॑ दे॒वा अस॒न् वशे॑ । ५

ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ॑ । अ॒हो॒रा॒त्रे पा॒र्श्वे ।

नक्ष॑त्राणि रू॒पम् । अ॒श्विनौ॒ व्यात्त॑म् । इ॒ष्टम् म॑निषाण
।

अ॒मुं म॑निषाण । सर्व॑म् मनिषाण । ६

-*

SRI VEDA BHARATHI PEETHAM-BASAR
SRI VEDA VIDYANANDA SWAMIJI
https://vedabharathipeetham.org
https://www.youtube.com/c/SVBPSriVedaBharathiPeetham
Contact-8309925443/  G-Pay/Phone-pe-9441321492



ॐ तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ । गा॒तुं य॒ज्ञप॑तये । दैवी᳚स्स्व॒स्तिर॑स्तु नः ।

स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भेष॒जम् । शन्नो॑ अस्तु द्वि॒पदे᳚ । शं चतु॑ष्पदे ।

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ।

-*

SRI VEDA BHARATHI PEETHAM-BASAR
SRI VEDA VIDYANANDA SWAMIJI
https://vedabharathipeetham.org
https://www.youtube.com/c/SVBPSriVedaBharathiPeetham
Contact-8309925443/ G-Pay/Phone-pe-9441321492

